# श्रीमुनीश्वरसूरिकृत प्रमाणसारः ॥

सं. विजयशीलचन्द्रसूरि

'जैन तर्क'ने विषय बनावीने रचायेलो आ लघुग्रन्थ छे. भाषा सरस छे, अने रजूआत जाणे आकाशमां उड्डयन थई रह्युं होय तेवी छे. बे वाक्यो के बे युक्तिओ के बे मुद्दाओनी वच्चेनुं वाक्य, युक्ति, मुद्दो वाचके-भणनारे जाते ज योजी-समजी लेवानो रहे छे. घणीवार तो एक विषयनुं निरूपण करतां क्यारे बीजा विषयमां कर्ता सरी पडे छे ते पण कळवानुं कठिन बनी जाय छे. कर्तानो मुख्य आशय, वाद-विवादमां सामा पक्षने परास्त करवानी के विजय प्राप्त करवानी कुशलता हांसल करवानी रीत दर्शाववानो छे, जे ग्रन्थारम्भे लखेला तृतीय पद्यमां तेमणे ज स्पष्ट कर्युं छे. ए समय पण दार्शनिक-धार्मिक वादविवादनो हतो, एटले आवी रचनाओ घणी आदेय बनती होय तो ते संभवित छे.

आ ग्रन्थ त्रण परिच्छेदोमां वहेंचायो छे. प्रथम परिच्छेदमां प्रमाणना स्वरूपनी चर्चा छे. परन्तु अन्य ग्रन्थोमां जेम प्रथम अन्य-अन्य दर्शनोने मान्य एवा 'प्रमाण स्वरूप'नुं निरूपण थाय, अने पछी जैन दृष्टिए ते तमामनुं साथे के क्रमशः खण्डन करवापूर्वक जैनसम्मत 'प्रमाणस्वरूप' प्रतिष्ठित थाय, ते पद्धति आ ग्रन्थमां जोवा नथी मळती. आमां तो कर्ताने बोलतां बोलतां जे पळे जे मुद्दो के युक्ति मनमां ऊगे, तेनुं प्रतिपादन, पूर्वापरनो सम्बन्ध जळवाय छे के केम तेनी चिन्ता राख्या विनाज, तेओ निरूपतां जाय छे. रमतियाळ तेमज बोलचालनी भाषामां लखी रह्या होय तेवुं अनुभवाय. शक्य छे के ग्रन्थकार पोते कोई गम्भीर वाद-विवादमांथी पसार थया होय अने तेना परिपाकरूपे आ अन्योने मार्गदर्शक रूपरेखात्मक ग्रन्थरचना तेमणे सर्जी होय.

द्वितीय परिच्छेदमां प्रमाणोनी संख्या वगेरे प्रमाण-सम्बद्ध बाबतोनी विचारणा थई छे. तो त्रीजा परिच्छेदमां छ दर्शनोनी व्यवस्था अर्थात् स्वरूप परत्वे चर्चा छे. 'षड्दर्शनसमुच्चय'नो आभास थाय, पण वस्तुतः तेवुं नथी. अहीं तो दरेक वाते ग्रन्थकार खण्डनना लडायक मिजाजमां ज होवानुं जणाई आवे छे. एकंदरे जोतां ग्रन्थ भाषा-शैलीनी रीते सरल लागवा छतां जरा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कठिन अने दुर्बोध छे तेम मानवुं पडे तेम छे.

ग्रन्थकार आ. मुनीश्वरसूरि छे तेवुं प्रारम्भे आवता पांचमा पद्य परथी प्रतीत थाय छे. ते श्लोक प्रमाणे, "मुनीश्वरसूरिए मुनिहर्ष मुनिने आ हस्तबाण--(हाथवगुं बाण ?) आपेल छे", अने ते पण कोई "तार्किकोनी पर्षदामां जवानो सुयोग आवी लाग्यो हशे ते वखते", एवो अर्थ नीकळी शके छे. ग्रन्थकारना सत्ताकाळ विषे के अन्य कशी माहिती सांपडती नथी. मात्र आदर्श प्रतिना मथाळे 'नमः श्रीजिनराजसूरिभ्यः' एम लखेलुं छे, तेना आधारे ग्रन्थकार जिनराजसूरिना शिष्य के तेमनी परंपराना साधु होय तेम मानी शकाय. जिनराजसूरि खरतरगच्छना पंदरमा शतकमां थयेला एक प्रमुख आचार्य छे. तेमना शिष्यनी आ रचना पंदरमा शतकनी होवानुं अनुमान थाय छे. The New Catalogus catalogorum (Vol. 13, p. 46) (1991 A.D. Madras) मां आ विषे एटलो ज उल्लेख छे के "प्रमाणसार - Jain. by munisvarasuri" उपरांत, तेमां मुनि पुण्यविजयजीना संग्रहनी सं. अने प्रा. प्रतिओना सूचिपत्र (अमदावाद १९६३) नो हवालो आपवामां आव्यो छे.

मुनीश्वरसूरिना शिष्य मुनिहर्ष मुनिए कातन्त्र व्याकरण पर 'कातन्त्रदीपक' नामे विवरण लख्युं होवानी तथा ते अपूर्णप्राय मळतुं होवानी माहिती जयपुरस्थित विद्वान् म.श्रीविनयसागर तरफथी सांपडी छे, जे मुनिहर्ष मुनिनी संप्रज्ञतानो ख्याल आपी जाय छे.

आ ग्रन्थनी बे प्रति मळी छे. एक, भावनगरनी जैन आत्मानन्द सभास्थित श्री भक्तिविजयजी शास्त्रसंग्रहनी प्रति, जेनो क्रमांक ८८८ छे, अने ९ पानांनी प्रति छे. तेमां प्रान्तभागे 'स्वोपज्ञः प्रथमादर्शः' लखेल छे, ते परथी आ प्रति ग्रन्थकारे स्वयं प्रथम प्रतिलिपि तरीके लखी होवानी छाप पडे छे.प्रतना दिव्य अक्षरो तथा लेखशैली पण, प्रति पंदरमा सैकानी होय तेवुं अनुमान करवा प्रेरे तेवी छे. मात्र एक ज प्रश्न छे के जो कर्ताए स्वहस्ते लखेल होय तो आटली बधी अशुद्ध केम ? केटलीक तो महत्त्वनी क्षतिओ जोवा मळे छे, जे टिप्पणीरूपे नोंधेला थोडाक पाठान्तरो जोतां जणाई आवे छे.

आनी बीजी प्रति लींबडीना जैन ज्ञानभण्डारनी छे, जे अपूर्ण छे,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मात्र बे ज परिच्छेद प्रमाण छे, छतां तुलनामां घणी शुद्ध प्रति छे. त्रीजो परिच्छेद धरावतां शेष पानां अलभ्य होई तेना लेखक तथा लेखनसमय विषे कोई स्पष्ट निश्चय थतो नथी. आम छतां तेनी लखावट जोतां ते १६मा सैकामां लखाई होय तेवुं अनुमान थई शके तेम छे. १० पानांनी ते प्रतिमां ४थुं पत्र नथी, अने पाने पाने अनेक उपयोगी टिप्पणो लखेलां जोवा मळे छे. झांखी जेरोक्स प्रतिकृतिमां ते टिप्पणो उकेलवां जो के विकट छे. लींबडी भंडारमां क्र. ५४ तरीके ते प्रति नोंधायेली छे.

उपरोक्त बन्ने प्रतिओनी जेरोक्स नकल वर्षो पूर्वे प्राप्त थयेली. उक्त बन्ने भण्डारोना कार्यवाहकोनो आभार मानुं छुं.

'प्रमाणसार'नुं सम्पादन करवानी भावना घणां वर्षोथी मनमां हती. केटलांक वर्ष पूर्वे स्वर्गस्थ परमविदुषी अने चारित्रसम्पन्न साध्वी श्री पूर्णभद्राश्रीजीने, प्राचीन साहित्यना अध्ययन-संशोधनमां रस जागृत थतां, आ ग्रन्थनी प्रतिलिपि करवानुं कार्य तेमने सोंप्युं हतुं. पोतानी केन्सरग्रस्त नाजुक स्थितिमां पण तेओए आनी प्रतिलिपि स्वहस्ते करेली. परन्तु सम्पादनकार्य हाथ पर लेवाय ते पूर्वे ज तेमनो कालधर्म थयो, तेथी आ कार्य आम ज पडी रह्युं हतुं, जे वर्षो बाद आजे, नवेसरथी प्रतिलिपि-लेखन तथा सम्पादन पूर्वक अत्रे रजू थाय छे.

भावनगरनी प्रतिना आधारे वाचना तैयार करी छे, अने लींबडीनी प्रतिमांथी पाठान्तर तथा टिप्पणो नोंध्यां छे.

—x—

[1]नमः परमगुरुभ्यः श्रीजिनराजसूरिभ्यः ॥

ब्रूमः श्रिये तं वरिवस्य सार्वं रहस्यमुद्दिश्य विशेषदृष्टीन् ।
स्पष्टाष्टकर्मप्रकृतीर्विजित्य जग्राह योऽनन्तचतुष्टयं स्राक् ॥१॥

तर्कान्तविद्यां समवेक्ष्य जैनतीर्थान्यपि क्षोणिभुजां सभाश्च ।
स्वान्तं यदाशान्तरसान्तरासीन्मुदा तदाऽयं विहितोऽस्ति गुम्फः ॥२॥

अजिह्मवाग्ब्रह्मवशात् **प्रमाणसार**प्रबोधाख्यमधीत्य गुम्फम् ।
अखर्वगर्वान् प्रतिवादविद्यामुद्रार्थिनो दिग्विजये जयन्तु ॥३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रहस्यं प्रोक्तुकामस्य प्रमाणस्योपदर्शनम् ।
सागरं गन्तुकामस्य हिमवद्गमनोपमम् ॥४॥

[२]तदित(द)माः किमेतत् ? अविज्ञाततत्त्वेऽर्थे कारणोपपत्तितस्तत्त्व-ज्ञानार्थमूहस्तर्को रहस्यज्ञानं प्रमाणमिति । प्रमाणेन चरन्ति प्रामाणिकाः तेषाम् ।

श्रीमुनीश्वरसूरीन्द्रै-र्दत्तै[३]स्तार्किकपर्षदि ।

मुनिहर्षमुनेरेष हस्तबाणः प्रमाणतः ॥५॥

ननु प्रामाणिकानां चतस्रो विप्रतिपत्तयो भवन्ति-प्रमाणस्य स्वरूप(प) १, सङ्ख्या २, फल ३, विषय ४ लक्षणाः ।

तत्र 'प्रमाणस्य स्वरूप' मिति । आदितोऽत्र [४]साकांक्षं वचनं प्रमाणम्[५] । न, तद्विप्रमिणोतीति प्रमाता[६] । आत्मा वा प्रमाणम् ! न, साधकत्वात् कर्तृत्वाच्च । प्रमीयते योऽर्थः प्रमेयं वा प्रमाणम् । न, साध्यत्वाद्, अस्य कर्मपदत्वाच्च । प्रमातीति प्रमा, सम्यगनुभव एव वा प्रमाणम् । न, प्रमा-प्रमाणयोर्महान् भेदः । प्रमायाः कार्यरूपत्वात्, तावत्करणस्य कारणरूपत्वादिति ।

अथ 'घटमहमात्मना वेद्मी'ति-'अह'मित्यात्मा ज्ञाता कर्ता १, 'घट' मिति ज्ञेयं कर्म २, 'वेद्मी'ति फलं क्रिया ३, केन ? 'आत्मना'- ज्ञानेन ४, करण व्युत्पत्तेश्च कर्तृ-कर्मविलक्षण[७]त्वाद् वेदितव्य(व्यं) प्रमाणम् ।

प्रमातुः साधकत्त्वेन प्रमेयस्य साध्यतः ।
प्रमायाः फलरूपत्वात् साधनं त्वन्यदेव हि ॥१॥

प्रमीयते- परिच्छिद्यते संशयादिव्युदासेन वस्तुतत्त्वार्थोऽनेनेति प्रमाणमिति मुष्टिः । अथ किम् ? । अव्यभिचारि प्रमाणं, सम्यग्ज्ञानमिति यावत् । अपीदमेवं, परं व्यभिचारादन्यत्र । स तु संशयादिभ्य एव प्रादुःष्याद्, अतस्तया (स्ते आ)विष्कृत्याऽनभ्यासमित्याः ।

तत्र उभयकोट्यवलम्बी संशयः । यथा कश्चिद् विपश्चित् कुतश्चिदन्धतमसे परितः प्रसर्पति प्रान्तरे शिरःपाण्यादिलक्षणं क्षणं स्थाणुमालोक्य सन्देग्धि- 'किं स्थाणुरयं' ? , एका कोटिः, 'आहोश्वित् पुरुषो वा ?', द्वितीया कोटिः । अनिश्चितज्ञानमिति यावत् । तत्र अनिश्चितैककोट्यवलम्बी ह्यनध्यवसायः । यथा-पुन्नागनागवनराजिनिकुञ्जे 'किंसंज्ञको वृक्ष' इत्येका कोटिरेव ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अतस्मिंस्तदध्यवसायो विपर्ययः । शुक्तिकाशकले रजतज्ञानं, अन्यथाख्यातिः ।

एष वन्ध्यासुतो याति खपुष्पकृतशेखरः ।
मृगतृष्णाम्भसि स्नात्वा शशशृङ्गधनुर्धरः ॥१॥

इत्यसत्ख्यातिः । तर्जन्याश्चक्षुर्विक्षेपे 'द्वौ चन्द्रा'विति, सुप्तस्य गजादिदर्शनं च । मिथ्याध्यवसाय इति यावत् । न प्रमाणमेतद्, अर्थक्रियाकारित्वाभावात् । 'यदेवाऽर्थक्रियाकारि तदेव परमार्थसद्' इति न्यायपक्षः कक्षीकरणार्हः । तदितरथा प्रेक्षावतां चक्षुःसमक्षं पर्षदन्तः कथं साध्यमानं साधिमानमञ्चेदिति ब्रूमो भ्रूमोटनाश्रिताः । न हि भ्रान्तिज्ञानेऽर्थक्रियाकारित्वम् ।

पुनरुररीकरोति-प्रमाश्रयः प्रमाता १, प्रमाविषयः प्रमेयं २, सम्यगनुभवः प्रमा ३, प्रमाकरणं प्रमाणमिति ४ चतुष्टयम् ।

ब्रह्माद्वैत-ज्ञानाद्वैत-शून्यवादिनः प्रमाणादिचतुर्विधसत्तावादिनं प्रति विप्रतिपद्यन्ते । तथा हि-

अद्वैतं परमं ब्रह्म नेह नानाऽस्ति किञ्चन ।
आरामं तस्य पश्यन्ति न तत् पश्यति कश्चन ॥१॥

एक एव हि भूतात्मा देहे देहे व्यवस्थितः ।
एकधा बहुधा चैव दृश्यते जलचन्द्रवत् ॥ इत्यादि ॥

चराचरं ब्रह्मविवर्त्तमेव स्त्यानीभूतं(त)घृते कणा इव । वस्तुप्रपञ्चो मिथ्या, प्रतीयमानत्वात् । वास्तवः परिणामः किं सूक्ष्मरूपः स्थूलरूपो वा ? ।

यथा यथा विचार्यन्ते विशीर्यन्ते तथा तथा ।
यद्येतत् स्वयमर्थेभ्यो रोचते तत्र के वयम् ? ॥१॥

तदेतत् पृथिव्यप्तेजोवाय्वाकाशादिविश्वं मध्याह्नार्कमरीचिकासु पयःपूर इव प्रतिभाति ।

किमहो सत्तावादिन्(ऽसत्तावादिन् ?)! प्रमाण्या(णा?)द्यन्तरेण कथा प्रवृत्तिहेतुकवाग्यवहारो न स्यात् । तथा च **लौकायतिके**[10] बादरायणीयाभ्युपगमे कथाप्रवृत्तिदर्शनात् । अथ भवतु नाम । अद्वैतं प्रमाणसिद्धमुताऽप्रमाणसिद्धं वा ? । पौरस्त्यः पक्षश्चेद्, दत्तोऽद्वैतवादाय जलाञ्जलिः । एकमद्वैतं, द्वैतीयकं[11]

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रमाणं–इति द्वैतापत्तिः । अप्रमाणसिद्धं चेत्, असिद्धमसिद्धेन साध्यते । इति चेद्, अस्तु, किं सिद्धयै ब्रूमः?। [13]कणेहत्य वैयात्यतः पराश्चैर्युयुत्सुरिति प्रमाणसत्तावादिनं प्रति खण्डनवादी प्रत्यवतिष्ठते । तर्हि–

लोकद्वैतं फलद्वैतं कर्मद्वैतं विरुध्यते ।
गुरुशिष्यत्वमेवेति बन्धमोक्षद्वयं तथा ॥१॥

तदिदं विष्टपं द्विष्ठमिष्टं कथमद्वैतं सङ्गतिमङ्गति ? । मध्येसभं यत् प्रोच्यमानं हि नौचितीमञ्चति ॥

प्रत्यक्षैकप्रमाणवादिनोऽसद्दर्शिनश्**चार्वाका** अपि प्रमाणं न प्र[14]माणयन्ति, निगदन्ति च–यश्च परलोकात्मसर्वज्ञमोक्षाभावः प्रत्यक्षपथातिक्रान्तत्वाद् वाजिविषाणवत् । अनुमानागमौ सर्वज्ञाभावान्न प्रमाणम् । नास्त्यात्मा । संयोगचैतन्यमात्रमेव । धातुकीकुड्मलगुडाम्भःसंयोगादुन्माद इव प्रादुर्भवतीति ।

यत्किञ्चिदेतत् पलालपूलप्रायम् । तदुदर्कतोऽनेडकमूका ब्रूयुर्नाम, का नो हानिः ? ।

संयोगतो भूतचतुष्टयस्य यज्जायते चेतन इत्यवादि ।
मरुच्चलत्पावकतापिताम्भःस्थाल्यामनेकान्तमिहास्तु तस्य ॥१॥
सुखादि चैत्यमानं हि स्वतन्त्रं नानुभूयते ।
मतुबर्थानुवेधात्तु सिद्धं ग्रहणमात्मनः ॥
'इदं सुख'मिति ज्ञानं दृश्यते न घटादिवत् ।
'अहं सुखी' ति तु ज्ञप्ति- रात्मनोऽपि प्रकाशिका ॥

इत्येवं गणशो वाचोयुक्तीनां वचोयुक्तिभिरात्मनि सिद्धे भवमोक्षौ सिद्धावेव ॥

दर्शनं तदागमः । तन्निदर्शादर्शदर्शनिनः स्वव्यवस्थाया अवस्थिताः षट्। जैन नैयायिक २ वैशेषिक ३ साङ्ख्य ४ सौगत ५ मीमांसका ६ इति। एतैस्तु प्रमाणसत्ता[15]कोटिकुटीरमटाट्यते । एतावता प्रमाणं प्रामाण्य सिद्ध(द्धि)सौधमध्यमध्यासीनम् । सिद्धं नः समीहितम् । जितं जितं वाद्यतां मित्र ! झल्लरी ।

अलमलं गल्लझल्लरीझात्कारेण । किं बंहीयान् अनेहा नीरसो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निरस्यते ? । उत्तिष्ठोत्तिष्ठ अप्रामाणिक ! प्रामाणिकमण्डलीतः । प्रकृतं ब्रूमहे । हे महेच्छाः ! तावदनुष्ठीयते[१६] प्रमाणगोष्ठी ॥

अविज्ञाततत्त्वेऽर्थे कारणोपपत्तितस्तत्त्वज्ञानार्थमूहस्तर्कः प्रमाणाङ्गं संशयादिव्युदासविशदं प्रमाणपदमासाद्य तत्त्वज्ञानार्थी कारणोपपत्तीर्मृगयते । भावा अविज्ञातपरमार्था अवान्तरभेदकारणज्ञानेन निर्णीतार्थाः स्युः ।

मानाधीना मेयसिद्धि-र्मानसिद्धिश्च लक्षणात् ।

प्रमाणमिति साकांक्षं वचनं तत्र मानसिद्धिश्च लक्षणात् (?) ॥

तत्र लक्षणं द्वेधा-सामान्यलक्षणं १ विशेषलक्षणं च २ । तत्र स्वपरजातीयव्यावर्त्तको धर्मो लक्षणमसाधारणमेव । पटाद् घटस्वरूपं व्यावर्त्तयति, घटात् पटस्वरूपं, इति स्वपरजातीयव्यावृत्तिः ।

लक्षणे त्रीणि दूषणानि - अव्यापकत्वं १ अतिव्यापकत्वं २ असम्भवित्वं ३ चेति । स्वपक्षमपि न व्याप्नोति अव्यापकम् । यथा- ब्राह्मणश्चतुर्वेदाभिज्ञः । [१७]व्रात्येनाऽनैकान्तिकत्वात् । स्वपरपक्षसिद्धौ समत्वेऽतिव्यापकत्वम् । यथा-[१८]यज्ञोपवीतधारी ब्राह्मणः । क्षत्रियादावतिव्याप्तिः । ब्राह्मणेन सुरा पेया, द्रवद्रव्यत्वात्, क्षीरवद्, इत्यसम्भवित्वं चेति ॥

इह हि न्यायशास्त्रे चतुर्द्धा प्रवृत्तिरस्ति - उद्देशो १ लक्षणं २ परीक्षा ३ विभाग ४ श्चेति ॥ उद्देशः किमुच्यते ? । नाम्ना पदार्थानां संक्षेपेणाऽभिधानमुद्देशः । उद्दिष्टस्य स्वपरजातीयव्यावर्त्तको धर्मो लक्षणम् । लक्षितस्य यथाक्रमं विचारः परीक्षा । परीक्षितस्याऽवान्तरभेदप्रकटनं विभागः ॥

ततः प्राक्सूत्रे प्रमाणस्वरूपादुद्देशः कृतः, ततो 'यथोद्देशं निर्देश' इति न्यायमाश्रित्य चतुर्द्धा विप्रतिपत्तौ प्राक् प्रमाणस्वरूपमाह-स्वपरव्यवसायि ज्ञानं प्रमाणम् । स्वं आत्मा-ज्ञानस्य स्वरूपम् । परः स्वस्मादन्योऽर्थ इति यावत् । तौ विशेषेण यथावस्थितस्वरूपेण अचेतनस्य सन्निकर्षादेः पराकरणेन अवस्यति-निश्चिनोतीत्येवं शीलं यत् ज्ञानं [तत्] स्वपरव्यवसायि प्रमाणमिति सामान्य-लक्षणम् । ततो ज्ञानमेवैतत् । ज्ञानस्यैको ह्युत्पत्तिक्षणः द्वितीयो ज्ञप्तिक्षणः । ज्ञानस्य प्रामाण्यमप्रामाण्यं च । अवग्रहेहादिभिरासन्नदशायां घटादिज्ञानोत्पत्तिक्षणे । प्रमेयाव्यभिचारित्वं प्रामाण्यं परतः । अनभ्यासदशायां तु सानुमति धूमवत्त्वात्,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गोपालघट्यादौ सदोषवह्निमत्त्वज्ञानोत्पत्तिक्षणे । अप्रामाण्यं परत एव ॥ ज्ञप्तिक्षणे तु ज्ञानस्य प्रामाण्यं संवादकज्ञानतः स्वतः प्रादुर्भवति । ज्ञप्तिक्षणे तु बाधकज्ञानतोऽनासन्नदशायामप्रामाण्यमपि परत इति ॥

तदिदं विवादास्पदीभूतमदुष्टं सिद्धं प्रमाणस्वरूपम् । ततः उत्पद्य ज्ञानं किं गृह्णीयात् ?। यत्तावदुक्तं 'प्रमीयते वस्तुतत्त्वार्थोऽनेने'ति, तत् सामान्यविशेषाद्यनेकात्मकं वस्तु । पूर्वापरपरिणामसाधारणं द्रव्यं सामान्यं, तदाश्रया विशेषाः । गुणपर्यायवद् द्रव्यम् । यथा-आत्मनि ज्ञानं सहभावी गुणः । यथा-आत्मा द्रव्यम्, ज्ञानं गुणः । क्रमभावी पर्यायः । यथा-आत्मनि नरनारक तिर्यक्त्वादिः ।

द्रव्यं पर्यायवियुतं पर्याया द्रव्यवर्जिताः ।
क्व कदा केन [१९]किंरूपा दृष्टा मानेन केन वा ? ॥१॥

द्रव्यापेक्षया सर्वे भावा नित्याः । पर्यायापेक्षया सर्वेऽनित्याः । उत्पादव्ययध्रौव्यात्मकं सत् । तद्भावाव्ययं नित्यम् । आदीपमाव्योम नित्यानित्यम् । मानाधीना मेयसिद्धिः । प्रमेयं प्रमाणसिद्धमिति ॥

कथमिति परे गिरं सङ्गिरन्ते- अयुतसिद्धानामाधार्याधारभूताना'मिह' प्रत्ययहेतुः सम्बन्धः समवायः । यथा शिलातलशकलयुगलानुसन्धायकं तार्तीयके (तार्तीयीक ?)तया रालादिद्रव्यम् । तथेन्द्रियार्थज्ञानसम्बन्धी इह प्रत्ययो विशेष्यविशेषणभावात्मकः । इह भूतले घटोऽस्ति । इह भूतले घटो नास्ति। शुक्लरूपं कृष्णरूपशून्यम् । इह शुक्लरूपे कृष्णरूपं नास्ति । गृह्यते येन यद्भावस्तदभावस्तेन गृह्यते । तदपरे प्राहुः-

इन्द्रियेण परिच्छिन्ने रूपादौ यदनन्तरम् ।
तद्रूपादिस्ततस्तस्य मनोज्ञानं प्रवर्तते ॥१॥

आत्मा मनसा संयुज्यते मन इन्द्रियेण इन्द्रियमर्थेनेति ॥

शब्दार्थपरिज्ञानं च । वाच्यवाचकभावसम्बन्धाद् वाच्योऽर्थः । वाचकः शब्दः । स्वाभाविकसंकेतितशब्दग्रहणान्नियमितार्थस्यैव ग्रहणं किम् ? । पृथुबुघ्नोदराद्याकारवानर्थक्रियाकारि दासीशिरसि चेष्टते इति घटः । 'घट' इत्युक्ते तरङ्ग-शृङ्ग-भृङ्ग-भृङ्गारादिषु घट एवादीयते, न तु पटः । नात्र सम्बन्धाभावो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वक्तुं युक्तः । अथ तदयं शब्दार्थयोर्भवंस्तादात्म्यं तदुत्पत्तिर्वाच्यवाचकभावो वा ? । प्राचि पक्षे, 'स एवाऽऽत्मा यस्ये'ति शब्दार्थद्वये ह्येकत्वमेव, सर्वभावानां शब्दरूपताऽर्थरूपता वा । यदि शब्दरूपता, तर्हि भावानां स्ववाचकत्व स्वभावानां युगपत् सर्वदा गुमगुमायमानतापत्तेः शंकी(गी?)तकारम्भनिभृतमिव त्रिभुवनं चकास्यात् । पट शब्दोच्चारणत एवाऽऽवरणक्रिया प्रसज्येत । भावानामर्थरूपतैव चेत्, तर्हि खड्गाग्निमोदकोच्चारणे वदनस्य च्छेद-दाह-पूरणादिप्रसक्तिः । अथ द्वये ह्येकत्वं कथम् ? । शब्दस्तु कर्णकोटरावलम्बी, साक्षात् क्षितितल मिलितकुम्भस्तम्भाम्भोरुहादिभावराशिसरित्यतस्तावत्तादात्म्यपक्षोऽपि न क्षेमकारः ।

तदुत्पत्तिरपि-शब्दादर्थ उन्मज्जेदर्थाद्वा शब्दः । शब्दादर्थश्चेत्, तर्हि घटशब्दोच्चारणे ति(ऽपि) जलाहरणक्रिया सिद्धैव, को नाम सूत्रखण्डदण्ड चक्रचीवरादिकारणमीलनक्लेशमाश्रयेदिति वाक्यतः प्रयोजनं सिद्धम् । द्वितीयभिदायां तु अर्थाद्वा शब्दः । स तु ताल्वोष्ठपुटादिव्यापारादेव दृष्टः । न तु कलशादेः ।

वाच्यवाचकभावोऽपि तदवस्थो व्यवस्थादौस्थ्यस्थेमानमास्तिघ्नुते । किं वाच्यवाचकयोर्भेदो वा १ अभेदो वा २ भेदाभेदो वा ३ ? । भेदश्चेत्, तर्हि तन्नियमितार्थग्रहणाभावादसम्बद्धतालूतालता लालग्यात् । अभेदः, कथं साक्षात् शब्दार्थावुपलभ्येते ? । तदित्ययुक्तिबन्धकीसंपर्कतोऽस्पृश्य एवाऽयं पक्षः । भेदाभेदपक्षश्चेत्, पर्यायान्तरे[ण]कथञ्चिदविश्वग्भावात्मकः सम्बन्ध एवाऽङ्गीकृतः मुधामद्वि(?) तदिति तटादर्शिशकुन्तपोतन्यायाज्जिनोक्तिष्वेव विश्रामः ।

अर्थोपलब्धौ सन्निकर्षादेः प्रामाण्यमामनन्ति **वैशेषिकाः** । अदग्धदहन-न्यायेन तान् प्रत्याचक्ष्महे । न च सन्निकर्षादेरज्ञानस्य प्रामाण्यमुपपन्नम् । तस्या-ऽर्थान्तरस्येव स्वार्थव्यवसितौ साधकतमत्वानुपपत्तेः । न ह्यचेतनः स्तम्भः स्तम्भान्तरं निश्चिनोति । नहीन्द्रियवदञ्जनभोजनादेः सन्निकर्षादर्थान्तरज्ञानं संजाघटीति । द्रव्येन्द्रियं तु भावेन्द्रियाधीनम् । भावेन्द्रियं ह्यात्मज्ञानमेव[१०] । युक्तं तस्वीकृतं स्यादिति फलितार्थः । अपि च-

अर्थस्य प्रमितौ प्रसाधनपटु प्रोचुः प्रमाणं परे
तेषामञ्जनभोजनाद्यपि भवेद् वस्तु प्रमाणं स्फुटम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आसन्नस्य तु मानता यदि तदा संवेदनस्यैव सा
स्यादित्यन्धभुजङ्गरन्ध्रगमिवत् तीर्थैः श्रितं त्वन्मतम् ॥१॥

अत्यन्त [२१]व्यावृत्तानां पिण्डानां यतः कारणादन्योऽन्यस्वरूपानुगमः प्रतीयते तदनुवृत्तिप्रत्ययहेतुः सामान्यम् । एकाकारा प्रतीतिरेकशब्दवाच्यता [२२]वाऽनुवृत्तिः । सर्वत्र गोत्वं[२३]गोत्वमिति ।

भावाः सामान्यविशेषात्मकाः स्वभावसामग्रीतः स्वत एव सामान्य विशेषार्प्पकाः स्युः । घटे घटत्वमिति सामान्यम् । तदाश्रयाः सङ्ख्यावर्ण-परिमाणादयो विशेषाः ॥

निर्विशेषं हि सामान्यं भवेत् खरविषाणवत् ।
सामान्यरहित्वेन विशेषास्तद्वदेव हि ॥१॥

सामान्यरहिता विशेषा माण्डूकजटाभारानुकाराः । विशेषरहितं सामान्यमपि तदवस्थम् । तदिति सामान्यविशेषाद्यनेकात्मकं वस्तु प्रमेयम्, अनुगतविशिष्टाकारप्रतीतिविषयत्वात् पूर्वापर(रा)कारपरित्यागोपादानस्वरूप परिणामेनाऽर्थक्रियाकारित्वाच्च सिद्धम् ॥

**सामान्यपक्षवादिनो मीमांसकाः** । सामान्यतोऽर्थक्रियां कुर्युः । विशेषवादिनो **बौद्धाः** । विशेषानेव प्रमाणयन्ति, सामान्यं पराकुर्वन्ति । **जैना-स्तु** अवियुतसामान्यविशेषस्वरूपवादिनः ॥

अथ तत्त्वं अनन्तधर्मात्मकमेव, सत्त्वान्यथानुपपत्तेरिति । एकान्तपक्षोऽपि न क्षोदक्षमः । "उत्पादव्ययध्रौव्ययुक्तं सत् ।" तावदेकान्तनित्यस्य सत्त्वस्याऽऽत्मादेः सुखदुःखोपभोगः कथम् ? । एका सुखावस्था, अपरा दुःखावस्था । नहि गुणो गुणिनमतिरिच्य क्वचन केवलोऽवलोकितः । अवस्थाभेदेऽवश्यमवस्थावतोऽपि भेदः स्यात् । "अयमेव[२४] भेदो भेदहेतुर्वा यद् विरुद्धधर्माध्यासः कारणभेदश्चेति" । स्वभावभेद एव हि कारणमनित्यतायाः ॥ तर्ह्येवमेकान्तनित्यात्मनोऽनित्यतैव प्रत्युत भवितुमर्हति । लाभमिच्छतो मूलक्षितिरेवैवम् । गेहेनर्दितया स्वगृह एव प्रणिगद्यमानं हृद्यम् । न तु प्रामाणिक प्रकाण्डपर्षदि । एकान्ताऽनित्यस्याऽऽत्मनस्तावत् कृतकर्मनाशोऽकृतकर्मोपभोगश्च । येनाऽनित्यात्मना सुकृतं कृतं स काकनाशं नष्टः । क्षणान्तरे सान्वयविनाशेन

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वासनां दत्वा अलक्तद्रवभावितबीजे कर्प्पासे रक्तता यथा, दग्धे [१]रामठे परिमलो यथा । तथा चामनन्ति-अपर एवात्मा अवतातरीति । तथा सति प्राकृतोपभोगोऽपरस्य कथंकारं प्राग्भवे स्मारं स्मारं दत्तमादत्ते कथमिति। येनाऽनित्यात्मना सुकृतं कृतं स तावच्चौरंकारं पलायितः । परकृतं कोऽयमपरः सम्बन्धविनाकृतो लभते ? । यः सापराधः स एव दण्ड्यो अत्र न तु माछ्यो (त्स्यो) न्यायः ॥ क्षणान्तरोत्पन्न आत्मा स्वकृतमेवोपभुङ्क्ते, न तु परकृतम् । अथ यत्तु(त्त)दस्तु नाम । अनित्यात्मगता सा वा वा(वासना)ऽऽत्मनो भिन्नाऽभिन्ना वा ? । भिन्ना चेत् कथं तस्येति सा ? । अभिन्ना चेत्, सा नित्याऽनित्या वा ? । नित्या चेत् स्वपदे कुठारप्रहारः । प्रतिज्ञाहानिर्नाम निग्रहस्थानम् । अनित्या चेत्, सा कौतस्कुती सहैवाऽत्मना वराकी काकीव करतालीभिस्त्रा-सितैव ॥ अथ क्षणिकात्मा सान्वयं निरन्वयं वा विनश्यति ? । सान्वयं चेत्, तर्हि समूलकाषंकषित एव । द्वारिकादाहे सन्देसा(शा)र्पकसन्देहवत् तत्र[न] कोऽपि क्षणान्तरभावी । सोऽयं **ताथागतधर्मकीर्तेः** पन्था दुस्तरः । का गतिस्तावदस्य ? । अथ क्षणिकात्मा निरन्वयं विनश्यति । अन्वयरूपां वासनां दत्वा क्षणान्तरभावी भवति चेत् । ननु **धर्मोत्तर**वादिस्तव सन्धासम्बन्धा-भिसन्धिरिति ॥ यत् किलात्मा क्षणविनाशी । अन्वयरूपा वासना तिष्ठति । सा वासनापरम्परां प्रवर्त्तयतीति नूनं नित्यानित्यगुण[२५]गणोपभोगभाक् स एवात्मा। अन्धभुजङ्गरन्ध्र[२६]मिव । यथाऽन्धो भुजङ्गो यत्र तत्र भ्रान्त्वा सरलस्वरन्ध्रमेव विशति । **परैः** पक्षान्तरे[२७] **जिनमत**मेवाऽऽश्रितम् ॥

मनस्ते कुत्रचिद् यातु वपुस्ते वर्तते नवा ।
यदेवार्थक्रियाकारि तदेव परमार्थसत् ॥इति॥

**सौगत- वृषष्यन्ती**[२८] प्रतिवादिषिङ्गवाग्भिरपि प्रस्तुतार्थः समर्थितः स्यादेव ॥

किञ्च - सत्त्वस्याऽनन्तधर्मात्मकत्वं भूयः प्रतिजानीते **जैनः** । नन्वेकान्तनित्यानित्यस्य क्रमाऽक्रमाभ्यां ह्यर्थक्रियाकारित्वं न घटते । एकान्तनित्यानित्यो भावः क्रमेणार्थक्रियां कुर्यादक्रमेण वा ? । क्रमो हि पौर्वापर्यम् । पाकक्रियायामधिश्रयणादिका क्रिया पूर्वभागः । निष्पन्नमित्यपरभागः । तत्रैकान्तनित्यस्य पूर्वापरभागौ न घटेते । अवस्थाभेदतोऽनित्यताप्रसक्तेरिति ।

---

१. हिङ्गु ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तावेकान्ताऽनित्यस्यापि न युज्येयाताम् । पूर्वभागोऽपरभागं यावत् क्षणक्षयी न प्रतीक्षते, मंक्षु क्षीयते च । युगपदुभयोरपि न सिद्धिरिति तात्पर्यार्थः ॥

अनन्तधर्मात्मकत्वमिति स्याद्वादलक्षणम् । 'सदेव[29] स' दुन्नी (र्नी) तिवाक्यम् १ । 'स्यात् सत्' नय(?)वाक्यम् २ । 'सदिति घटः' प्रमाण(?)वाक्यम् ३ । "घटोऽस्तीति न वक्तव्यम् । सन्नेव हि घटो यतः ॥" सत्तायामपि सत्तायोगेऽनवस्था । "नास्तीत्यपि न वक्तव्यं, विरोधात् सदसत्त्वयोः" ॥ प्रत्यक्षविरोधः ।

"सर्वमस्ति स्वरूपेण पररूपेण नास्ति च ।
अन्यथा सर्वसत्त्वं स्यात् स्वरूपस्याप्यसम्भवः ॥२॥

एकस्मिन् भावे सत्त्वमसत्त्वं च विरोधः ।

परस्परविरोधे हि न प्रकारान्तरस्थितिः ।
नैकतापि विरुद्धानामुक्तमात्रविरोधिनी ॥३॥

विरोधे चाऽविरोधे च प्रमाणं कारणं मतम् ।
प्रतीयते चेदुभयं विरोधः कोऽयमुच्यते ? ॥४॥

नीलोत्पले द्वयं यथा । नरसिंह इति । भागे सिंहो नरो भागे । द्वयस्यैकार्थकारित्वान्न विरोधः । अथ-

गुडो हि कफहेतुः स्यान्नागरं पित्तकारणम् ।
द्वयात्मनि न दोषोऽस्ति गुडनागरभेषजे ॥

तथा मेचकवस्तुष्वपि द्वयं न विरुद्धं, सत्प्रमाणप्रसिद्धेरिति ।

एकान्तनित्यो भावः कथं कार्यकारणतामश्नुते ? । एका कारणावस्था, अपरा कार्यावस्था । कारणं त्रेधा-समवाय(यि)कारणं १, असमवायि[30]कारणं २, निमित्तकारणं ३ चेति । प्राप्तानां प्राप्तिः समवायः । यथा घटे रक्तत्वादिरूप-समवायः । अप्राप्तानां प्राप्तिः संयोगः । यथा-इह कुण्डे बदराणि । तत्र समवा[31]यिकारणं घटोत्पत्तौ मृदादि, पटोत्पत्तौ तन्तवः । असमे[32]वायिकारणं सूत्रखण्डदण्डचक्रचीवरादि, पटोत्पत्तौ तुरीवेमादि । निमित्तकारणं कुलालादि, पटे कुविन्द इति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत्र कारणे कार्योपचारात् कारणं मृदादि, कार्यं घटादि । कारणस्य कार्यं चेत् तदनित्यतापत्तिः । यत् कृतकं तदनित्यम् । तुल्यकालत्वे युगपत् चेत्, किं कस्य कारणं किं कस्य कार्यम् ? । उभयोस्तुल्यकालत्वाद्, अङ्गुल्योरिव ॥

एकान्तानित्यपक्षोऽपि क्षणक्षयित्वात् कथं कार्यकारणभावमासादयति ? । कारणापलापे कार्यमेवास्तीति चेत्, तदुदितः यो यदनन्तरः । कारणापेक्षया कार्यं, कार्यं कारणमन्वेषयति । क्षणिकत्वे तावत् कारणं कार्यं यावन्न प्रतीक्षते[33] । **सौगतमते** कारणमसत् कार्यमप्यसत् । कारणे विलीने कार्यं [34]किमधिकृत्य प्रवर्तते । कार्यं तु कारणाधीनमेव । कारणाभावे कस्य कार्यमिति ।

क्रियते इति कार्यम् । अपेक्षितपरव्यापारो हि भावः स्वोत्पत्तौ कृतक इत्युच्यते । 'सापेक्षमसमर्थम्' । कारणापेक्षं हि कार्यम् । कार्यकारणत्वे चाऽर्थक्रियाकारित्वम् । तर्ह्येवं कार्यं पर्यायरूपमनित्यं, कारणं द्रव्यरूपं नित्यम् । अथेत्थमप्यनेकान्तमतं प्रसिद्धिसमाधिसौधमध्यमध्यास्ते । तथा चैकान्तनित्यानित्ययोः का गतिः ? ।

एकान्तनित्यवादी **साङ्ख्यो**ऽनित्यपक्षे दोषलक्षमाख्याय प्रतिपक्षं **सौगत**माक्षिपति, नित्यपक्षे[35] गुणांश्च प्रकाशयति । एकान्तानित्यवादी **बौद्धो**ऽपि स्वपक्षं सगुणं जल्पन् एकान्तनित्यपक्षं सदोषं प्रतिजा[36]नीते । **साङ्ख्यं** पराकुरुते ॥ तदेवं कण्टकेषु परस्परध्वंसिषु सोऽयं नित्यानित्यगुणवाननेकान्तः परभा[37]गतः सर्वोत्कर्षेण वर्तते । एवं सति ह्यनन्तधर्मात्मकता प्रणिगद्यमाना हृद्यैव । तथा हि-

पयोव्रतो न दध्यत्ति, न पयोऽत्ति दधिव्रतः ।
अगोरसव्रतो नोभे तस्माद् वस्तु त्रयात्मकम् ॥१॥

घटमौलिसुवर्णार्थी नाशोत्पादस्थितिष्वयम् ।
शोकप्रमोदमाध्यस्थ्यं जनो याति सहेतुकम् ॥२॥

प्रध्वस्ते कलशे सु(शु)शोच तनया मौलौ समुत्पादिते
पुत्रः प्रीतिमवाप कामपि नृपः शिश्राय मध्यस्थताम् ।
पूर्वाकारपरिक्षयस्तदपराकाराश्रयस्तद्द्वया-
धारश्चैतदिति स्थितं त्रयमिति न्यायावलीढं वचः ॥३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अपि च- स्याद्वादः प्रमाणस्वरूपं । स्यादित्यव्ययं अनेकान्तद्योतकम् । स्याता उपलक्षितः सदसन्नित्यानित्याभिलाप्यानभिलाप्यो वादः स्याद्वादः । [38]तत्रेयं सप्तभङ्गी-

'स्यादस्त्येव सर्व' मिति विधिकल्पनया प्रथमो भङ्गः १ । स्यान्नास्त्येव सर्वमिति निषेधकल्पनया द्वितीयो भङ्गः २ । स्यादस्त्येव स्यान्नास्त्येव क्रमतो विधिनिषेधकल्पनया तृतीयो भङ्गः ३ । स्यादवक्तव्यमेवेति युगपद्विधिनिषेधकल्पनया चतुर्थो भङ्गः ४ । स्यादस्त्येव स्यादवक्तव्यं निषेध (विधि)कल्पनया युगपद्विधिनिषेधकल्पनया पञ्चमो भङ्गः ५ । स्यान्नास्त्येव स्यादवक्तव्यं निषेधकल्पनया युगपद्विधिनिषेधकल्पनया षष्ठो भङ्गः ६ । स्यादस्त्येव स्यान्नास्त्येव स्यादवक्तव्यं क्रमतो विधिनिषेधकल्पनया युगपद्विधिनिषेधकल्पनया सप्तमो भङ्गः ७॥

या प्रश्नाद् विधिपर्युदासभिदया बोधच्युता सप्तधा
धर्मं धर्ममपेक्ष्य[39]वाक्यरचनाऽनेकात्मके वस्तुनि ।
निर्दोषा निरदेसि(शि) देव ! भवता सा सप्तभङ्गी यया
जल्पन् जल्परणाङ्गणे विजयते वादी विपक्षं क्षणात् ॥

ग्रन्थगौरवभयादत्रैतावदुक्तम् । विस्तरतः **स्याद्वादरत्नाकरादवसेयम्** ॥

**इति प्रमाणसारे प्रमाणस्वरूपप्ररूपकः स्वोपज्ञः प्रथमादर्शः** ॥[40]

( २ )

अथ प्रमाणस्वरूपविप्रतिपत्तिहेतुं प्रदर्श्य प्रमाणसङ्ख्याप्रतिपत्ति[41]मुसन्ति[42]। अथाऽनेकान्तमतप्रामाण्यमभ्युपगम्य जितकासी प्रत्युत प्रत्यवस्थानपुरःसरं परवादिनं प्रतिवादी **जैनः** प्रतिजानीते ।

ननु भो वादिन् ! प्रश्नः[43] क्रियताम् ।

परः- 'कियन्ति प्रमाणानि' ? ।

इत्युक्ते **जैनः** - जिज्ञासाऽऽविष्करणं प्रश्न इति । ज्ञातुमिच्छा जिज्ञासा । अत्र ज्ञाते सति पृच्छा, अज्ञाते वा ? । सुनिश्चिताशेषपदार्थपरमार्थस्य किमर्थं पृच्छा ? । अज्ञाते वा कः[44] कृती कर्ममर्मविनाकृतेन वृथाप्रलापिना सम्यग् वाग्जन्मवैफल्यं नाटयति ? ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परः - [45]एवं भवदभिमतं मतं विवेचयाम इति चेत् ।

तत्कि सामान्यलक्षणप्रश्नो वा विशेषणलक्षणप्रश्नो वा ? । न परः। को नामाऽपक्रियमव्यवहार[46]सामान्यमाद्रियते ? ।

'भाना[47] एव हि भासन्ते संनिविष्टा यथा तथा' । इति ।

जातिः सामान्यम् । गोत्वं सर्वत्र । इयं कृष्णा गौरिति दोहनक्रियायां तस्यामेवाऽर्थक्रियाकारित्वम् । न तु सर्वजातौ । मैवम् । किं तत्र गवि स्वरूपसत्त्वं स्वीक्रियते न वा ? । अजातित्वेन खुरककुदः(द) सास्नालक्षणानडुहोऽपि दोहनप्रसक्तेः । स्वरूपसत्त्वाभावात् । स्वरूपपसत्त्वं चेत्, तदेव सामान्यम् । तत्रैव सङ्ख्यापरिमाणादिविशेषा इति । निर्विशेषं हि सामान्यं प्रागुक्तयुक्त्या सिद्धमेव, किं पिष्टपेषणम् ? ।

तत्र सामान्यतः प्रमाणलक्षणमुक्तम् । सम्प्रति विशेषतः प्रस्तुतमनुसन्धीयते॥ प्रत्यक्षं च परोक्षं च द्वे प्रमाणे । सार्वज्ञं ज्ञानं प्रथमं जानाति, ततः पश्यति । अस्मदादिज्ञानं प्रथमं पश्यति, ततो जानाति ।

आहुर्विधातृ प्रत्यक्षं न निषेद्धृ विपश्चितः ।
नैकत्व[48] आगमस्तेन प्रत्यक्षेण प्रबाध्यते ॥१॥

आगमप्रमाणं निषेधकं क्वापि विधायकम् । प्रत्यक्षं तु विधायि(य)-कमेव। 'न निषेद्धृ' कोऽर्थः ? । **वैशेषिक**मतमुद्दिश्य प्रत्यक्षमनुमानाधीनं चक्षुरादिप्रकाशकम् ।

ननु ग्राहकं पूर्वानुभूतं तदाकारतया तदिष्टं साध्यं साधयतीति ।

प्रमाणेतरसामान्य-स्थितेरन्यधियो गतेः ।
प्रमाणान्तरसद्भावः प्रतिषेधाच्च कस्यचित् ॥१॥ इति ।

**चार्वाका** अपि प्रत्यक्षं(क्ष)योग्यार्थमात्रग्राह[49]का गिरं सङ्गिरन्ते स्म।-नास्त्यात्मा, प्रत्यक्षप्रमाणातिक्रान्तत्वादिति ॥

'अक्षं अक्षं प्रति प्रत्यक्ष'मित्यव्ययीभावान्नियतनपुंस्त्वं' स्यात् । अक्ष[50]शब्दादपि चेत्, न चैवं स्पर्शनादिप्रत्यक्षं नैतच्छब्दवाच्यं स्यादिति । अतः अक्षमिन्द्रियं, ततः प्रतिगतं प्रत्यक्षमिति सिद्धम् । तदिदं[51] प्रत्यक्षस्वरूपस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संवेदनस्य स्वाभाविकसामर्थ्यसंकेतितार्थबोधबुद्धिशब्दाभ्यां अनुमानाद्याधिक्येन विशेषप्रकाशनं स्पष्टत्वम् ।

तत् प्रत्यक्षमपि द्विप्रकारं - सांव्यवहारिकं पारमार्थिकं च । तत्र इन्द्रियाऽनिन्द्रियनिमित्तं देशतः सांव्यवहारिकं प्रत्यक्षम् । तत्रेन्द्रियाणि विषयिणः पञ्च-स्पर्शन १ रसन २ घ्राण ३ चक्षुः ४ श्रोत्राणि ५ । विषया अपि पञ्चेति स्पर्श १ रस २ गन्ध ३ रूप ४ शब्दाः ५ ।

रसन-स्पर्शन-घ्राण-श्रोत्राण्ये[२](णी?)न्द्रियताबलात् ।
चक्षुरप्राप्यविज्ञातृ मनोवत् प्रतिपद्यताम् ॥१॥

अपराणीन्द्रियाणि प्राप्यकारीणि । यथा श्रोत्रेन्द्रियं शब्दपुद्गलं प्राप्यैवार्थं गृह्णीयादिति । तावच्चक्षुरप्राप्यकारि अन्येन्द्रियताबलत्वान्मनोवत् । अन्येन्द्रियासदृशं चैतत्, तस्मादप्राप्यकार्येव । अनिन्द्रियमनित्यं आत्मपरि[३]माणं मनः । सांव्यवहारिकं मानसमपि प्रत्यक्षम् ॥ **परमते** तु नित्यमणुपरिमाणं मन इति ॥

चेतः सनातनतया कलितस्वरूपं, सर्वापकृष्टपरमाणुपवित्रितं च ।
प्रायः श्रि[४]यः प्रणयिनीप्रणयातिरेकादेतत्करोति हृदये न तु तर्कतज्ञः॥१॥

इत्यपि सण्टङ्कविटङ्कः ।

पारमार्थिकज्ञाने कैवल्ये ह्यात्ममात्राधीनत्वादिति विभङ्गि प्रतिपातिज्ञानस्य संक्षिप्तत्वादेव । मनसो नित्यता स्वप्नेऽपि दुर्लभा स्यादित्युत्तानार्थः ॥

इन्द्रियाऽनिन्द्रियनिमित्तमपि प्रत्यक्षं चतुर्द्धा । अवग्रहेहावाय धारणाभेदादेकशश्चतुर्विकल्पम् । एकसामयिकः सत्तामात्रग्राहकोऽवग्रहः । विशेषाकांक्षणमीहा । विशेषनिर्णयोऽवायः । स एव दृढतमावस्थापन्नो धारणा ॥ ज्ञप्तौ हि क्रमोऽमीषामयमेव, अन्यथा प्रमेयाऽनवगतिप्रसङ्गः । सामान्यमात्रग्राही प्रथमसामयिकोऽर्थावग्रहः । क्रमाविर्भूतापूर्वापूर्ववस्तुपर्यायप्रकाशकः स्यात् । संशयादिनिरासान्यथानुपपत्तेः । क्वचिदवग्रहादीनामाशूत्पादात् । ज्ञानोत्पत्तिक्रम-स्याऽनुपलक्षणं हि युगपन्नागवल्लीदलशतव्यतिभेदवच्चेति । सांव्यवहारिकं प्रत्यक्षम् ॥

तत्र पारमार्थिकं चात्ममात्रापेक्षं प्रत्यक्षम् । तद् द्विविधं-अवधिमनः-पर्यायज्ञानभेदात् । क्षेत्रावधिरूपिद्रव्यगोचरं भवगुणप्रत्ययं ह्यवधिज्ञानम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संयमविशुद्धेरुत्पन्नं मनोद्रव्यपर्यायालम्बनं मनःपर्ययज्ञानम् ।

सकलं तु द्रव्यक्षेत्रकालभावसामग्र्या क्षपकश्रेण्युपशमश्रेणिभ्यां च क्षीणमोहगुणस्थानोदये ज्ञानावरणीय-दर्शनावरणीया-ऽन्तराय-मोहनीय-अशाता वेदनीयकर्मप्रकृतिषु समूलकाषंकषितासु आयुर्नामगोत्रसातावेदनीयकर्मप्रकृतिषु दग्धरज्जुप्रायासु ""सतीषु करकलितामलकीफलवत् समस्तवस्तुपर्याय-सांक्षा[त्का]रि स्वरूपं केवलज्ञानम् ॥

अत्र पुरुषविशेषप्रकृतयः । अधमाधमः १, अधमः २, विमध्यमः ३, मध्यमः ४, उत्तमः ५, उत्तमोत्तमः ६, इत्येतादृग्विधविष्वद्रङ्मतिविविध-बुधसविशेषपुरुषविशेषस्य निःशेषिताशेषदोषस्य हि केवलित्वम् । आत्मनः केवलावस्थानमिति यावत् । तथा सति कृतज्ञानावरणविवरतिमिर व्यतिकरपरिक्षये सार्वज्ञमेव । ननु पुरुषसेमुखी(शेमुषी)तारतम्ययोगतो ज्ञानतारतम्यं क्वचिद्वि-श्रान्तमेव ॥

अत्र **ताथागतः** प्रत्यवतिष्ठते ।-

सर्वं पश्यतु वा मा वा, तत्त्वमिष्टं तु पश्यतु ।
कीटसङ्ख्यापरिज्ञानं तस्य नः क्वोपयुज्यते ? ॥१॥

अत्र सर्वदर्शित्वे सर्वज्ञत्वे च तात्पर्यं हि सर्वगतपरिज्ञानाभावादन्वय व्यतिरेकाभ्यां हेयापादेयस्वरूपप्ररूपणमसङ्गतं वनीवच्यते ॥ तद्वानर्हन्निर्दोषत्वा[त्], निर्दोषोऽयं प्रमाणाऽविरोधिवाक्यात् ।

रागाद्वा द्वेषाद्वा मोहाद्वा वाक्यमुच्यते ह्यनृतम् ।
यस्य तु नैते दोषास्तस्याऽनृतकारणं किं स्यात् ? ॥

इति विशेषार्थः ॥

न च कवलाहारेण सार्व्वज्ञं हीयते । ज्ञानं आधेयभूतं, शरीरमाधा-ररूपम् ।

देहो हि पुग्गलमओ आहाराईहिं विरहिओ न भवे ।
सिद्धा य अणाहारा सेसा आहारगा जीवा ॥

इत्याप्तोक्तेः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उत्पन्ने ज्ञाने विशदत्वमेव, न त्विन्द्रियतृप्तिः । अस(श)नायोदन्ययो-राहारेणैव तुष्टिः । ज्ञानं ह्यात्मगुणः, आहारसंज्ञा तु शरीरस्य । क्षुधोदन्ये हि वेदनामुत्पादयतः । शातावेदनीयशेषमस्तीति[५६] चेत् । अतो वेदनीयान्तर्भूते एते, नैव मोहनीयकर्मप्रकृती । इति **केवलिभुक्तिः** ॥

स्त्रीवेदमर्जितं कर्म, स्त्रीपुंसावात्मकर्मक्षये हि मुच्येते । आत्मा ह्युभयत्र समान एवेति **स्त्रीमुक्तिः** ॥

महाव्रतिनां हि द्वेधा नयः – निश्चयो व्यवहारश्च । व्यवहारनयः समवसरणादिभिर्जिनैरपि स्वीकृतः । व्यवहारनये हि प्रतिष्ठार्थं भवत्प्र-व्रजितादिभिर्वस्त्रप्रावरणमाद्रियते गुरुभिर्न । कोऽयं गुरुशिष्यन्यायः ? । छद्मस्थैस्तु तीर्थंकरातिशयस्पृहा तु स्वप्नेऽपि दुर्लभ्या । व्रीडापदं ह्युभयत्र समानमेवेति सिद्धा वस्त्रप्रतिष्ठा ॥ इति प्रस्तावागताः प्रकटं **दिक्पटाः** परिचये पर्यनुयोज्याः ॥

अथाऽस्पष्टं परोक्षम् । स्मरण १ प्रत्यभिज्ञान२ तर्का३ऽनुमाना ४ गम ५ भेदतस्तत् पञ्चप्रकारम् । तत्र **नैयायिकाः** स्मरणज्ञानं प्रमाणाङ्गं नाभिमन्यन्ते । तन्मते ज्ञानमर्थजं, स्मरणं त्वविद्यमानस्यैव पदार्थस्य । तत्तत्संस्कार-प्रबोधादुद्भूतमनुभूतार्थगोचरं [१]तदित्याकारं वेदनं स्मरणम् । यथा-स देवदत्त इति । तत्तीर्थकरबिम्बं च । ननु त्वन्मतेऽपि अनुमानमविनाभावभावित-धूमधूमध्वजयोः पूर्वानुभवस्मरणादेव प्रमाणमनुमानम् । अप्रामाणिकस्मरण-सन्दर्शित-स्याऽनुमानाङ्गस्य स्वीकारः कथं युक्तियुक्तः स्यादिति । परं पूर्वानुभूत-साधनादविद्यमानस्यैव साध्यस्य वह्निमत्त्वादेः परिज्ञानम् । तस्यापि कालान्तरे क्षेत्रान्तरेऽपि प्रत्यक्षीकरणार्हत्वाददोषः । एवं तत्तत्संस्कारप्रबोधः[५८] साधनं, पूर्वानुभवसंवेदनं साध्यं सिद्धमनुमानाङ्ग[५९]मिति ॥

तत्र प्रत्यभिज्ञानं ह्यनुभवस्मरणसाधनाद्यदभिज्ञानं शबलशाबलेयादि परिणामसामान्यवृत्त्या सर्वत्र गोत्वविषयं 'स एवाऽयं जिनदत्त' इत्यादि । यथा चैत्राभिज्ञानान्मैत्रोऽपि साध्यते ॥ **वैशेषिको**पमानं तु गोसदृशो गवय इति । तथा गोविसदृशो महिष इत्यपि स्यात् । नालिकेरद्वीपवासिनो हि द्वयमप्यप्रसिद्धमिति दुर्दुरूढकण्टकोद्धारः ॥

---

१. तदित्यतीतार्थग्राहिणी प्रतीतिः स्मृतिः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्र तर्क ऊहापरनामा विचार इति यावत् । कालत्रयवर्तिनोः साध्यसाधनयोरविनाभावसम्बन्धव्याप्त्या वाच्यवाचकविषयाविष्करणम्, इदमस्मिन् सत्येव भवतीत्याकारं वेदनं, तर्क ऊह इति संज्ञान्तरं लभते । ये तु **ताथागता** ऊहस्य प्रामाण्यं नोहांचक्रिरे, घटपटादिरित्यपोहमात्रम्, तेषामशेषशून्यत्ववादस्य निरवकाशत्वापत्तेः ॥ आः ! किमिदमकाण्डकूष्माण्डाडम्बरोड्डमरमभिधीयते ?। तावच्छृणु, श्रावयामि ।

तर्कस्तावदनुमानप्रामाण्यस्य प्राणाः । अनुमानं तु प्रत्यक्षप्रमाण-प्रामाण्यप्राणाः ।

प्रमाणेतरसामान्यस्थितेरन्यधियो गतेः ।
प्रमाणान्तरसद्भावः प्रतिषेधाश्च कस्यचित् ॥ इत्याहुः ॥

ऊहस्तावत् सामान्यविशेषात्मकवस्तुनः सम्बन्धालम्बनम् । तैस्तु प्रमाण[60]-ज्ञानविनाकृतैः पदार्थापोहः प्रोच्यते । अत एवाऽयमलब्धपरमार्थः शून्यवादी[61] प्रसिद्धः । ऊहसिद्धिरित्यनुमानविशेषलक्षणं, सामान्यलक्षणं तु साधनात् साध्यविज्ञानमनुमानं प्रसिद्धमिति ॥

आगमो ह्याप्तवचनमाप्तिं दोषक्षयं विदुः ।
क्षीणदोषोऽनृतं वाक्यं न ब्रूयाद् हेत्वसम्भवात् ॥

इत्याप्तवचनादाविर्भूतमर्थसंवेदनमागमः । उपचारादाप्तवचनं च । अभिधेयं वस्तु यथावस्थितं यो जानीतेऽवञ्चकः स आप्तः । स च द्वेधा- लौकिको लोकोत्तरश्च । लौकिको जनकादिः । लोकोत्तरस्तु तीर्थकरादिः । इति कालत्रय-प्रमातृप्रवक्तृप्ररूपितस्यागमस्य सिद्धिः ॥ प्रमाणसङ्ख्या-विप्रतिपत्तिरपास्ता ॥

अथ प्राचीनोत्तराकारपरित्यागोपादानेनानुगतप्रतीत्या, तस्य विषयश्च सामान्यविशेषाद्यनेकात्मकं वस्तु, ह्यर्थक्रिया सामर्थ्याऽन्यथाऽनुपपत्तेः । सामान्यं द्विप्रकारं-तिर्यगूर्द्ध्वतासामान्यभेदात् । गोत्र१साधारण२जातित्वात् ॥ विशेषोऽपि द्विरूपो गुणः पर्यायश्च । ज्ञानादिः सहभावी गुणः । सुखदुःखनरनारकादिः क्रमभावी पर्यायः । इति निरस्ता तद्विषयविप्रतिपत्तिः ॥

यत् प्रमाणेन साध्यते तदस्य फलम् ॥ नैगम १ सङ्ग्रह २ व्यवहार ३ ऋजुसूत्र ४ शब्द ५ समभिरूढ ६ एवम्भूताः ७ सप्त नयाः ॥ अस्य नयस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

फलं प्रमावत् । तद् द्विविधं – आनन्तर्येण पारम्पर्येण । किन्तु प्रमातृस्वरूपमेव फलम् । न प्रमातरि सत्तावादिनां विप्रतिपत्तिरिति सिद्धम् ॥

इति **प्रमाणसारे** प्रमाणस्य सङ्ख्या विषय फल विप्रतिपत्तिव्याषेधको द्वितीयः परिच्छेदः ॥

★

(३)

दर्शनव्यवस्थास्थापनार्थमिदमुपक्रम्यते । ननु खलु भोः शारदशशाङ्क-समुज्ज्वलयशसो विशारदाः ! शुभवद्भिर्भवद्भिरहरहः शास्त्राभ्यासः समातन्यते । तदिह प्रेक्षाचक्षुःसमक्षं सापेक्षं स्वपक्षे साधनं परपक्षे बाधनं कुर्महे हेच्छ्वः ॥ हंहो ! आदितस्तावज्जैन १ नैयायिक २ बौद्ध ३ सांख्य ४ वैशेषिक ५ जैमनीया ६ इति दर्शनानि षट् ॥

तत्र जैना अनेकान्तवादिनः । स्यादस्ति, स्यान्नास्ति । स्यादित्यव्ययं हि अनेकान्तद्योतकम् । एकस्मिन् सम्मुखवास्तुनि वस्तुनि घटादावस्तित्वं नास्तित्वं चेत्यनेकान्तः ।

सर्वमस्ति स्वरूपेण पररूपेण नास्ति च ।
अन्यथा सर्वसत्त्वं स्यात् स्वरूपस्याप्यसम्भवः ॥ इति ॥

घटे घटत्वमस्ति, 'यदेवाऽर्थक्रियाकारि तदेव परमार्थसत्' । घटे च पटत्वं नास्तीति तत्रैव पटाभावो युक्त्या जातः केन निराकर्तुं शाशक्यते ?। अपि च नित्यानित्यत्वं परस्परविरुद्धमप्यनेकान्तयुक्त्या ह्येकस्मिन्नेव वस्तुनि उभयम् ।

यतः – द्रव्यं पर्यायवियुतं पर्याया द्रव्यवर्जिताः ।
क्व कदा केन किंरूपा दृष्टा मानेन केन वा ? ॥ इति ॥

गुणपर्यायवद् द्रव्यम् । सहभाविनो गुणाः । यथाऽऽत्मनि ज्ञानविज्ञानादयः । क्रमभाविनः पर्यायाः । यथाऽऽत्मनि नरनारकतिर्यगादय इति । द्रव्यापेक्षया य एव भावो नित्यः पर्यायापेक्षया स एवाऽनित्य इत्यविरोधः ॥

द्वे प्रमाणे–प्रत्यक्षं च परोक्षं च । ज्ञानात् कर्मक्षये मोक्षः । मुक्ताः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संसारिणो द्विविधा जीवाः । त्र्यवयवं वाक्यमनुमानम् । सति कारणे कार्यम् । आत्मा कर्ता भोक्ता च । कर्मवादिनो जैनाः । कर्मणः प्राधान्यं च । न हीश्वरः कर्त्ता भवितुमर्हति । कर्मापेक्षत्वे सति सामर्थ्यरहितत्वात् । प्र(प्रा)कृतवत् । सृजेच्चेत् स्वार्थात् कारुण्याद्वा ? । न पौरस्त्यः । तस्य कृतकत्वात् स्वार्थः कश्चन नास्ति । न द्वितीयः । परदुःखप्रहाणेच्छा हि कारुण्यम्, अतः सर्वान् सुखिन एव सृजेत् । नो वा मूकैडकुब्जजात्यन्धजातमात्रविपत्तिवाग्भिः कर्ममर्मवशगैः किमपराद्धम् ? । अथ च – तृणतरुपुरन्दरधनुरभ्रादीनामपि कर्तृपारवश्यं न संपश्यामहे । स कर्ता सशरीरो वा [अशरीरो वा]? । सशरीरश्चेत् कुलालकुविन्दादिवद् घटपटोत्पत्तौ दृश्यरूपतापत्तेरिति विशरारुतालतालूता लालग्यात् । अतोऽनीश्वरं जगत्, स्वस्वकर्मविपाकप्रादुर्भूतप्रभूतपुनर्भवत्वादिति सिद्धम् । दत्तः कर्तृवादाय जलाञ्जलिः ॥

तत्र **नैयायिका** जटाधरविशेषा अक्षपादाः कर्तृवादिनः । उर्वीपर्वततर्वादिकं बुद्धिमद्धेतुकं कार्यत्वादिति । कार्यं घटादि । कारणं त्रेधा समवायिकारणं १ असमवायिकारणं २ निमित्तिकारणं च ३ । समवायिकारणं मृदादि । असमवायिकारणं सूत्रखण्डदण्डचक्रचीवरकुलालादि । निमित्तकारणं हीश्वर एव ॥

ईश्वरप्रेरितो गच्छेत् स्वर्गं वा श्वभ्रमेव वा ।<br>
अन्यो जन्तुरनीशोऽयमात्मनः सुखदुःखयोः ॥इति॥<br>
सुखमात्यन्तिकं यत्तद् बुद्धिग्राह्यमतीन्द्रियम् ।<br>
तं वै मोक्षं विजानीयाद् दुःप्रापमकृतात्मभिः ॥<br>
आनन्दं ब्रह्मणो रूपं तच्च मोक्षं विभज्यते ॥

प्रत्यक्षमनुमानमागम इति प्रमाणत्रयम् । प्रतिज्ञा १ हेतूर दाहरणो ३पनय४निगमनान्य५वयवाः । पञ्चावयवं वाक्यम् । पृथिव्यप्तेजोवाय्वाकाशकाल-दिगात्ममनांसीति नव द्रव्याणि ॥ प्रमाण १ प्रमेय २ संशय ३ प्रयोजन ४ दृष्टान्त ५ सिद्धान्ता ६ वयव ७ तर्क ८ निर्णय ९ वाद १० जल्प ११ वितण्डा १२ हेत्वाभास १३ च्छल १४ जाति १५ निग्रहस्थानानां १६ षोडशपदार्थानां तत्त्वज्ञानान्निःश्रेयसाधिगम इति । षोढा सम्बन्धसम्बद्धसन्निकर्षप्रमाणवादिनो नैयायिकाः सिद्धम् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ **बौद्धाः** एकान्तानित्यवादिनः । अनधिगतार्थाधिगन्तृप्रमाण-वादिनस्ताथागता यौगाः शून्यवादिनः ज्ञानाद्वैतवादिनश्च ।

ज्ञानिनो धर्मतीर्थस्य कर्तारः परमं पदम् ।
गत्वाऽऽगच्छन्ति भूयोऽपि भवं तीर्थनिकारतः ॥१॥

इत एकनवते कल्पे शक्त्या मे पुरुषो हतः ।
तस्य कर्मविपाकेन पादे विद्धोऽस्मि भिक्षवः ॥२॥

यथा यथा विचार्यन्ते विशीर्यन्ते तथा तथा ।
यदेतत् स्वयमर्थेभ्यो रोचते तत्र के वयम् ? ॥३॥

प्रपञ्चोऽयं मिथ्या प्रतीयमानत्वात् मृगतृष्णाम्बुवत् । क्षणक्षयित्वाद्धि कार्यापोह एव न तत्कारणम् । आलक्तकद्रवभाविते कर्पासे रक्तता यथा । दग्धे रामठे परिमलो वा । क्षयस्वभावाः क्षणाः प्रतिक्षणं क्षीयमाणा निरन्वयविनाशिनः क्षीयन्ते । परमन्वयरूपा वासना तिष्ठति । तयैव व्यवहारः स्यात् । अपि च - गोत्वसामान्यं अर्थक्रियाकारित्वाभावाद् व्यर्थं, किन्तु व्यवहारिणो विशेषा एव । इयं कृष्णा गौर्दोहनक्षमेति विशेषार्थता । प्रमाणद्वयं-प्रत्यक्षमनुमानं च ।

धर्मकीर्तेरमी शिष्या भगवद्वेषधारिणः ।
माने पद्मे जपन्त्यङ्गं पात्रप्राप्तमदन्ति च ॥१॥

तत्र **सांख्याः** कापिला एकान्तनित्यवादिनोऽमी ।
सांख्या निरीश्वराः केचित् केचिदीश्वरवादिनः ।
सत्कर्मवादिनः केऽपि केचित् कर्तृत्ववादिनः ॥

असदका(क)रणादुपादानग्रहणात् सर्वसम्भवाभावात् ।
शक्तस्य शक्य[करणात्]कारणा(ण)भावाच्च सत्कार्यम् ॥

अतिदूरात् सामीप्यादिन्द्रियघातान्मनोऽनवस्थानात् ।
[सौक्ष्म्याद्व्यवधानादभिभवात् समानाभिहाराच्च ॥]

सौख्या(क्ष्म्या)त् तदनुपलब्धिर्नाभावात् कार्यतस्तदुपलब्धेः ।
महदादि तच्च कार्यं प्रकृतिस्व(स)रूपं विरूपं च ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः ॥

मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त ।
षोडशकश्च विकारो न प्रकृतिर्न विकृतिः पुरुषः ॥

अव्यक्तमेकम् । महदहंकारपञ्चतन्मात्राणि (?) त्रयोविंशतिविधं व्यक्तम् ।

पञ्चविंशतितत्त्वज्ञो यत्र तत्राश्रमे रतः ।
जटी मुण्डी शिखी वापि मुच्यते नाऽत्र संशयः ॥

एषामाविर्भावतिरोभावौ कारणम् ।

नित्यः शब्दोऽकृतकत्वाद् आकाशवत् । यद्यदकृतकं तन्नित्यं यथा संप्रतिपन्नम् । शब्दो हि ताल्वोष्ठपुटादिव्यापारैः सत्कारण एवाविर्भाव्यते, न तूत्पाद्यते । यथाऽपवरकान्तः सन्तमसे तिरोभूतः पदार्थसार्थः प्रदीपप्रकाशेन प्रादुःक्रियते, न तु जन्यते । यतोऽविद्यमानस्य वाजिविषाणस्याऽनुत्पत्तिरेव । न षष्टस्य भूतस्याऽसद्रूपस्यैवाविर्भावः । भावानां विपत्तिस्तु कारणाभावात्तिरोभाव एव । भावाः सामग्रीसद्भावे प्रादुर्भवन्ति, आविर्भावाभावात् तिरोभवन्ति । कारणवादिनोऽमी । कार्यं हि कारणस्य रूपमन्यथा वा ? । कारणं स्थिरैकरूपं चेद् विश्वं नित्यमेव ॥ प्रत्यक्षमनुमानमागम इति प्रमाणत्रयम् । प्रकृतिवियोगो मोक्षः । प्रकृतिस्वरूपाया विराम एव प्रकृतेः । प्रकृतिः करोति प्रकृतिश्च भुङ्क्ते । आत्मा दर्पणवत् प्रतिबिम्बमात्रफलं लभते ॥

[वैशेषिकैस्तु]द्रव्य १ गुण २ कर्म ३ सामान्य ४ विशेष ५ समवायाः ६ षट् पदार्थास्तत्त्वतयाऽभिप्रेताः । अर्थोपलब्धिहेतु प्रमाणम् । प्रत्यक्षानुमानागमोपमानानि चत्वारि प्रमाणानि । तत्रोपमानं – यादृग् गौस्तादृग् गवयः ।

कीदृग् गवय इत्येवं पृष्टो नागरिकैर्यदा ।
वदत्यारण्यको वाक्यं यथा गौर्गवयस्तथा ॥१॥

बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्कारा नवाऽऽत्मगुणाः । सुखादिगुणसन्तानोच्छेदे मोक्षः । आत्मविशेषगुणानां सन्तानोऽत्यन्तमुच्छिद्यते सन्तानत्वात् । यो यः सन्तानः स सोऽत्यन्तमुच्छिद्यते ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथैतान् विप्रतिपन्नाः सङ्गिरन्ते-को हि नाम शिलाकल्पमपगतसुख-संवेदनमात्मानमुपपादयितुं यतेत ? । यतः -

वरं वृन्दावने रम्ये क्रोष्टृत्वमपि वाञ्छति ।
न तु वैशेषिकीं मुक्तिं गौतमो गन्तुमिच्छति ॥१॥

सामान्यविशेषात्मकवादिनः अक्षपादा वैशेषिका जङ्गमकापालिक-विशेषाः ॥

भग[व]द्वेषधारिणो **भाट्टाः प्राभाकराः** । ब्रह्माद्वैतवादिनो मीमांसका-परपर्यायाः सामान्यवादिनः । प्रमाणादिचतुष्टयं न स्वीकुर्वते । सर्वं ब्रह्मविवर्तमेवेति ।

एक एव हि भूतात्मा भूते भूते व्यवस्थितः ।
एकधा बहुधा चैव दृश्यते जलचन्द्रवत् ॥१॥

अद्वैतं परमं ब्रह्म नेह नानाऽस्ति किञ्चन ।
आरामं तस्य पश्यन्ति न तत् पश्यति कश्चन ॥२॥

अशरीरा देवाः । चतुर्थ्यन्तं पदमिति देवताः । यथा वषडिन्द्रायेति ।

अतीन्द्रियाणामर्थानां साक्षाद् द्रष्टा न विद्यते ।
नित्येभ्यो वेदवाक्येभ्यस्तत्त्वज्ञानार्थनिश्चयः ॥१॥

वाग्व्यवहारार्थं प्राहु**र्जैमनीयाः**-

प्रत्यक्षमनुमानं च शाब्दं चोपमया सह ।
अर्थापत्तिरभावश्च षट् प्रमाणानि जैमनेः ॥१॥

प्रमाणपञ्चकं यत्र वस्तुरूपे न जायते ।
वस्तुसत्तावबोधार्थं तत्राऽभावप्रमाणता ॥२॥

एतैः पञ्चभिः सत्तावादिभिरिव सर्वं ब्रह्म विवर्त्तमेव मन्यमानः ये (यै ?)रेवार्दितया (?) खण्डनवादी अप्रामाणिकः परास्त्रैर्युयुत्सुराशामोदक-तृप्त इव । जैनेनापि वाक्चपेटया प्रोच्चाटनीयः ॥

अथाऽसद्दर्शनिनो नास्तिकाः परलोकात्ममोक्षापलापिन**श्चार्वाकाः** लौकायतिका बार्हस्पत्याः विसदृशप्रत्यक्षैकप्रमाणवादिनो गिरं साङ्गिरन्ते स्म ।-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एतावानेव लोकोऽयं यावानिन्द्रियगोचरः ।
भद्रे ! वृकपदं पश्य यद्वदन्ति बहुश्रुताः ॥१॥

पिब खाद चयातिशोभने ! यदतीतं वरगात्रि ! तन्न ते ।
न हि भीरु ! गतं निवर्तते समुदयमात्रमिदं कलेवरम् ॥२॥

किञ्च- पृथ्वी जलं [तथा]तेजो वायुर्भूतचतुष्टयम् ।
चैतन्यभूमिरेतेषां मानं त्वक्षजमेव हि ॥३॥

किं च - नानाकारं जगत् भ्रान्तिमात्रं, मरुमरीचिकानिचयाम्बुवत् । पृथिव्यप्तेजोवायुरूपभूतचतुष्टयसमवायतश्चैतन्यम् । यथा धातुकीप्रसून-गुडद्रवसंयोगादुन्मादवत् । नास्तिकोऽसौ सर्वापलापी वृथाप्रलापी पापीयान् सर्वैरपि सत्तावादिभिः अभू(भि?)भूय च सम्भूय कैमुतकन्यायेन जैनेनापि निर्वास्य इति सिद्धः **षड्दर्शनसमुच्चय**तात्पर्यार्थः ॥

इति **प्रमाणसारे** प्रस्तावागतदर्शनव्यवस्थास्वरूपप्ररूपकस्तृतीयः परिच्छेदः ॥ **इति स्वोपज्ञः प्रथमादर्शः** ॥ भद्रं भवतु ॥

## टिप्पणानि । पाठान्तराणि ।

१. **ॐ नमः परमात्मने** । २. **तदिदमाः किमेतकन्न** । ३. **प्रोक्तस्तार्किक०** । ४. 'सभिप्रायम्' इति टि. । ५. प्रमाणं, **तद्धि प्रमिणोतीति प्रमाता वा प्रमाणम्** । ६. 'आत्मा' इति टि. । ७. **०विलक्षणं तद्वेदितव्यं** । ८. **तं** । ९. **स्त्यानीभूते** । १०. 'चार्वाकमत' इति टि. । ११. **द्वैतीयीकं** १२. 'अद्वैतपक्षः पुनः' इति टि. । १३. 'कणे मनस् तृप्तौ, तृप्तिं कृत्वा' टि. । १४. 'विषयमात्रग्राहकमेव तत् प्रत्यक्षं न तु प्रमाणभूतं' टि. । १५. **०सत्ताकौटिकुटीरकमटा०** । १६. 'विधीयते' टि. । १७. 'व्रात्यः संस्कारवर्जितः कथं चतुर्वेदज्ञाता' टि. । १८. 'यो यो यज्ञोपवीतधारी स ब्राह्मणः' टि. । १९. **केन संदृष्टा दृष्टा०** । २०. **०ज्ञानमेव युक्त्यन्तरेण स्वीकृतं** । २१. **अत्यन्तव्या०** । २२. **चाऽनु०** । २३. **गोत्वं गोत्वमिति** । २४. **०मेव हि भेदो०** । २५. **०गुणोपभोग०** । २६. **०रन्ध्रगमिव** । २७. **पक्षान्तरेण** । २८. **वृषष्यन्तीं** । २९. **सदेव सत् दु०** । ३०. **असमवायकारणं** । ३१. **समवाय०** । ३२. **असमवाय०** । ३३. **प्रतीक्ष्यते** । ३४. **कमधिकृत्य** । ३५.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**नित्यपक्षगुणांश्च** । ३६. **प्रतिजानानः** । ३७. **'गुणोत्कर्षतः'** इति टि. ३८. **तत्रायं** । ३९. **धर्ममपेक्ष्य** । ४०. **०दर्शः** ॥ **अविघ्नमस्तु** ॥ ४१. **०प्रतिपत्तिविप्रतिपत्तिमुसन्ति** । ४२. 'वदन्ति' इति टि. । ४३. **प्रश्निः** । ४४. **कस्कः कृती** । ४५. **मैवं भव०** । ४६. **०मव्यवहारि सा०** । ४७. **भागा** । 'विशेषाः' इति टि. । ४८. **नैकत्य** । ४९. **०ग्राहकां** । ५०. **अक्षि** । ५१. **तदिदं स्पष्टं प्रत्यक्षं प्रत्यक्ष०** । ५२. **०श्रोत्रान्येन्द्रिय०** । ५३. **०आत्मपरिणामं** । ५४. **प्रियप्रणयिनी०** । ५५. **सत्सु** । ५६. **०मस्तीति च** । ५७. **०प्रव्रजितार्यादि०** । ५८. **०प्रबोधसाधनं** । ५९. **०मनुमानमिति** । ६०. **प्रमाज्ञान०** । ५१. **०वादीति** । ६२.

★★★

Jain Education International For Private & Personal Use Only www.jainelibrary.org